# संस्कृत-वार्ता:

दिनाङ्क:- 29.05.2024
प्रात:- 06:55

## प्रचारभियानम्

सामान्य-निर्वाचनस्य अन्तिमचरणस्य प्रचाराभियानं शीर्षतां भजते। यतोहि मतदानाय दिनद्वयमेव अवशिष्टमस्ति। एतस्मिन् सप्तमे चरणे सप्तराज्यानां केन्द्रशासितप्रदेशस्य च सप्तपञ्चाशदासनेभ्य: मतदानं जूनमासस्य प्रथमे दिनांके भविष्यति। आहत्य चतुरधिक-नवशतं प्रत्याशिन: नैर्वाचनिक-समराङ्गणे सन्ति। प्रधानमंत्री भाजपेतिदलस्य च वरिष्ठनेता नरेन्द्रमोदी ह्य: पश्चिमबंगलास्य बारासात-बशीरहाट-लोकसभा-क्षेत्रयो: चतुर्विंशतिपरगना-जनपदे एकां जनसभां सम्बोधितवान्।

अस्मिन् अवसरे श्रीमोदी अवदत् यत् तस्य शासनकाले भ्रष्टाचारं प्रति शून्यसहिष्णुता वर्तते। प्रधानमन्त्री उक्तवान् यत् काङ्ग्रेसदलं इण्डि संयुतिः च सामान्यजनानाम् विषये न चिन्तयति, ते केवलम् आत्मनः चिन्तामेव कुर्वन्ति। सः अवदत् यत् पश्चिमबङ्गालस्य मतुआ समुदायस्य जनेभ्यः सीएए-इत्यन्तर्गतं नागरिकता दीयते। सममेव उक्तं यत् तदीय-प्रशासने महिलाः सशक्ताः भवन्ति इति। अपरत्र बिहारस्य मुख्यमंत्री नितीश-कुमार: नालन्दा-लोकसभासनस्य अष्टवन क्षेत्रे जनसभां सम्बोधयन् लालू-प्रसाद-यादवम् आलोचयत्। आर.जे.डी. प्रमुख: लालू-यादव: अवोचत् यत् ऐषम: निर्वाचनम् आरक्षणं संविधानं च संरक्षितुं वर्तते। अन्यत्र उत्तरप्रदेश-मुख्यमन्त्री योगी-आदित्यनाथ: गोरखपुरस्य प्रत्याशिन: रविकिशनस्य पक्षे प्रचारम् अकरोत्।

## हिमाचलाभियानम्

कांग्रेसदलीया महासचिवा प्रियङ्कागांधी भाजपेलिदलं आरोपितवती यत् एतद्दलं महार्घं दूरीकर्तुं वृत्यवसरप्रदानं च कर्तुं विफलं जातम्। हिमाचलप्रदेशस्य ऊनाजनपदे गगरेट क्षेत्रे एकं नैर्वाचनिक-जनसमागमं सम्बोधयन्ती एषा विगतवर्षस्य आपदां राष्ट्रियापदां न उद्घोषिते केन्द्रप्रशासनस्य कठोरालोचनां कृतवती। अत्रावसरे वरिष्ठकांग्रेसनेता मुख्यमंत्री च सुखविन्दर सिक्ख सुक्खुं समेत्य अन्ये नेतार: उपस्थिता: आसन्।

## प्रधानमंत्री-कन्याकुमारीयात्रा

प्रधानमंत्री नरेन्द्रमोदी अस्य मासस्य त्रिंशद्दिनांकात् कन्याकुमार्याः त्रि-दिवसीय-यात्रां प्रति यास्यति। सूत्रानुसारि कन्याकुमार्यां श्रीमोदी रॉकमेमोरियल इत्यस्य भ्रमणं करिष्यति अथ च ध्यानमण्डपम इत्यत्र ध्यानं साधयिष्यति। इदं तत् स्थानं वर्तते यत्र स्वामि-विवेकानन्दवर्येण ध्यानं कृतमासीत्। प्रधानमंत्री नैर्वाचनिक-अभियानानाम् उपरान्ते आध्यात्मिक-यात्राार्थम् अभिज्ञायते। नवदशाधिकद्विसहस्रतमे वर्षे असौ केदारनाथयात्रां कृतवान् आसीत्।

## पापुआ न्यू गिनी साहाय्यम्

विनाशकारं भूस्खलनं निध्याय भारतेन पापुआ न्यू गिनी राष्ट्रे साहाय्य-पुनर्वास-पुनर्निर्माण-प्रयासान् समर्थितुं एक-लक्षम् अमरीकी डॉलर मितस्य साहाय्य-राशेः घोषणा कृता। पापुआ न्यू गिनी इत्यत्र एंगा प्रान्ते अस्य मासस्य चतुर्विंशे दिने एकं विनाशकारं भू-स्खलनं जातम्। अस्मिन् भू-स्खलने शतशो जनाः आपीडिताः तत्र जनधन-हानिश्च सञ्जाता। विदेशमन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत् प्राकृतिक-आपत् कारणेन समुत्पन्ने काठिन्य-समये भारतं पापुआ न्यू गिनी देशेन सह विद्यते। मन्त्रालयेनोक्तं यत् आपत्-हानेः न्यूनीकरणं प्रबन्धनं च भारतस्य हिन्द-प्रशान्त-महासागर-नीतेः आई.पी.ओ.आई. इत्यस्याः एकः मुख्य-स्तम्भः वर्तते। अस्य घोषणा नवदशोत्तर-द्विससहस्र-तमे वर्षे नवम्बर-मासे प्रधानमन्त्रिणा नरेन्द्र-मोदिना कृतासीत्। भारतं मानवीय-साहाय्यं प्रति आपदोद्धारं प्रति च वचनबद्धम् अस्ति।